# वैदिकसाहित्ये कृषिपशुपालनव्यवस्था

**जिगरः एम्. भट्ट**

वैदिकसाहित्याध्ययनेन तत्र स्थिता अर्थव्यवस्था अस्माभिः ज्ञायते ।अस्मिन् साहित्ये कृषि–पशुपालनविभिन्नोद्योग–व्यापारादिविषयाणाम् अर्थव्यवस्थया सह सम्बद्धं वर्णनं प्राप्यते । वस्तुतः कस्यचिदपि देशस्य अर्थव्यवस्थायाः सुचारु सञ्चालनाय तस्य देशस्य कृषेः अधिकं महत्वं भवति । भारतं तु प्राचीनकालादेव कृषिप्रधानः देशः इति सर्वविदितम् । कृषेः जीवनाधायकं तत्त्वं प्रमुखतया भूमिः पर्जन्यश्च वर्तते अत एव अथर्ववेदीयपृथ्वीसूक्ते कृषिप्रधानदेशाय भूमेः पर्जन्यस्य च नमस्कारः विहितः।